दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् अधिकज्येष्ठकृष्णैकादशी
ज्येष्ठ 28 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-229 | 1 | जून 11, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 एम्स-बिलासपुर-संस्थाने शीघ्रमेव आरप्स्यते पेल्विस- शल्यचिकित्सा- सुविधा, गंभीर- आघात- ग्रस्तेभ्यः रोगिभ्यः भविष्यति महान् लाभः

3 इतिहासस्य वैज्ञानिकम् अध्ययनं प्रलेखनं च भाविनि-पीढीनां कृते अतीव उपयोगी- आचार्यः ललितकुमार अवस्थी

5 शिक्षाक्षेत्रे कृत्रिमप्रज्ञायाः (AI) प्रयोगाः

## सुभाषितम्

**निर्गुणेष्वपि सत्त्वेषु, दयां कुर्वन्ति साधवः।**
**न हि संहरते ज्योत्स्नां, चन्द्रश्चाण्डालवेश्मनः॥**

अर्थात्- सज्जन लोग, गुणहीन प्राणियों पर भी दया करते हैं। जैसे चन्द्रमा चाण्डाल के घर पर पड़ी चांदनी को नहीं समेट लेता है।

हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

# विश्वस्य नेतारः समावेशी-आर्थिक-गतिशील-भारतस्य विषये प्रधानमन्त्रिणः मोदिनः दृष्टिं च प्रशंसितवन्तः



**हिमसंस्कृतवार्ता।** प्रधानमन्त्री नरेन्द्रमोदी गतदिने भारतस्य लोकतान्त्रिकरूपेण निरन्तरतया सेवायमानः दीर्घतमः प्रधानमन्त्री अभवत्। श्रीमोदी चतुर्दशोत्तरद्विसहस्रतमे वर्षे मई-मासस्य षड्विंशति दिनाङ्के शपथग्रहणं कृतवान् आसीत्। सः पण्डित जवाहरलाल नेहरू वर्यस्य कीर्तिमतम् अतिक्रमितवान्, योहि प्रथमवारं द्विपञ्चाशदधिक ऊनविंशतिशततमे वर्षे मई त्रयोदश दिनाङ्के निर्वाचित-प्रधानमन्त्रीरूपेण शपथं स्वीकृत्य चतुःषष्ट्यधिक ऊनविंशति-शत-तमे वर्षे मई-मासस्य सप्तविंशति दिनाङ्कपर्यन्तं कार्यम् अकरोत्। पण्डित नेहरू वर्यस्य निर्वाचितप्रधानमन्त्रित्वेन कार्यकालः अष्टनवत्यधिक त्रिशतोत्तर चतुः सहस्र दिनानि यावत् आसीत्। इदानीं प्रधानमन्त्रिणः मोदी-वर्यस्य अविरत-कार्यकालः नवनवत्यधिक त्रिशतोत्तर चतुः सहस्र दिनानि यावत् अस्ति, येन सः भारतस्य इतिहासे दीर्घतमं कालं यावत् कार्यं कुर्वन् निर्वाचितः प्रथमः प्रधानमन्त्री अस्ति। राष्ट्रपतिः द्रौपदी मुर्मुः प्रधानमन्त्रिणं तस्य सेवायै अभिनन्दितवती। सामाजिकान्तर्जालीये पटले राष्ट्रपतिः अवदत् यत् अयं ऐतिहासिकः अवसरः देशस्य जनैः द्वारा तस्य नेतृत्वे स्थापितस्य चिरस्थायी विश्वासस्य च प्रमाणरूपेण वर्तते। विदेशमन्त्री डा. एस. जयशङ्करः, वाणिज्य-उद्योग-मन्त्री पियूष गोयलः, वित्तमन्त्री निर्मला सीतारामनः, कृषि-कृषक-कल्याणमन्त्री शिवराज सिङ्ह चौहानेत्यादयः केन्द्रीय-मन्त्रिणः, स्वतन्त्रभारतस्य दीर्घतम-निरन्तर-निर्वाचित-प्रधानमन्त्री भवितुं श्रीमोदिनं शुभाशयाः प्रेषितवन्तः। सामाजिक पटलीय संदेशे डा. जयशङ्करः अवदत् यत् एषा उपलब्धिः प्रधानमन्त्रिणः मोदिनः नेतृत्वे, दूरदृष्टौ, राष्ट्रियविकासं प्रति प्रतिबद्धतायां च भारतस्य जनानां चिरस्थायीविश्वासं च प्रतिबिम्बयति। केन्द्रीय-पेट्रोलियम-प्राकृतिक-गैस-मन्त्रिणा हरदीपसिंह पुरी वर्येण, पर्यावरण-वन-ऋतुदशा-परिवर्तन-मन्त्रिणा भूपेन्द्र यादवेण, ऊर्जामन्त्रिणा मनोहरलालेन, रक्षामन्त्रिणा राजनाथसिंहेन, विज्ञान-प्रौद्योगिकी-मन्त्रिणा जितेन्द्रसिंहेन, संस्कृति-पर्यटन-मन्त्रिणा गजेन्द्रसिंह शेखावतेन, विधि-न्याय-मन्त्रिणा अर्जुनराम-मेघवालेन चापि श्रीमोदिनम् अभिनन्दितम्। गतदिने राष्ट्रिय-राजधान्यां केन्द्रीय-मन्त्रिमण्डलस्य सभायां मन्त्रिमण्डलस्य सदस्याः अपि प्रधानमन्त्रिणं मोदी-वर्यं सभायाम् उत्थाय अभिवादनं कृतवन्तः। विश्वस्य नेतारः अपि श्रीमोदिनं प्रति शुभकामनाः प्रेषितवन्तः। श्रीलङ्का-देशस्य राष्ट्रपतिः अनुरा कुमार दिसानायके, पापुआ न्यू गिनी-देशस्य प्रधानमन्त्री जेम्स मारापे, त्रिनिदाद टोबैगो-देशस्य प्रधानमन्त्री कमला प्रसाद-बिसेसरादयः प्रधानमन्त्रिणः मोदिनः परिवर्तनशील-शासनं, वैश्विक दक्षिणस्य कृते तस्य समर्थनं, समावेशी-आर्थिक-गतिशील-भारतस्य विषये तस्य दृष्टिं च प्रशंसितवन्तः ।

## वस्त्राणां कृते पी. एल्. आई. योजनायाः तृतीयप्रक्रमस्य अन्तर्गतं षण्णवतिः समवाय-विशेषाः सर्वकारेण अनुमोदिताः




**हिमसंस्कृतवार्ता।** वस्त्राणां कृते उत्पादनसम्बद्धप्रेरणा (पी. एल्. आई.) योजनायाः तृतीयप्रक्रमस्य अन्तर्गतं द्वाविंशति नूतनानि आवेदनपत्राणि सर्वकारेण अनुमोदितानि। वस्त्र-मन्त्रालयः अवदत् यत्, योजनायाः तृतीय चक्रस्य अन्तर्गतं आहत्य षण्णवतिः समवाय-विशेषाः चिताः सन्ति, येषु द्वाविंशत्यधिक अष्टशतोत्तर द्वादशसहस्र कोटिरूप्यकाणां प्रतिबद्ध-निवेशः, अष्टपञ्चाशत्सहस्र कोटिरूप्यकाणां प्रत्याशित-व्यापारः च अस्ति।

## रक्षामन्त्रालयेन नौसेनायाः कृते विंशति उन्नत जैमर इत्येतेषां क्रयणार्थं प्रायः पञ्चशत-कोटिरूप्यकाणां अनुबन्धः स्वीकृतः

रक्षामन्त्रालयेन गतदिने भारतीय नौसेनायाः कृते विंशति एन्हान्स्ड्-केपेबिलिटि ग्लोबल्-नेविगेशन्-सेटेलाईट-सिस्टम् (जी. एन्. एस्. एस्.)-जैमर इत्येतेषां क्रयणार्थं ऊनपञ्चाशदधिक चतुः शतकोटिरूप्यकाणाम् अनुबन्धे हस्ताक्षरं कृतम्, यस्मिन् न्यूनातिन्यूनं पञ्चसप्तति प्रतिशतं यावत् स्वदेशी वस्तूनि भविष्यन्ति। क्रयणस्य (इंडियन-इंडीजनली डिज़ाइन्ड, डेवलप्ड एंड मैन्युफैक्चर्ड) प्रवर्गस्य अन्तर्गतं अनुबन्धः नवदिल्ल्यां रक्षासचिवस्य राजेशकुमारसिङ्घस्य उपस्थितौ हस्ताक्षरितः।

## अफगानिस्तान-देशस्य कुनार, खोस्त, पक्तिका इत्येतेषु प्रान्तेषु पाकिस्तानी सैन्य-वायु-आक्रमणे न्यूनातिन्यूनं त्रयोदशजनाः मृताः



अफगानिस्तान-देशस्य कुनार, खोस्त, पक्तिका इत्येतेषु प्रान्तेषु पाकिस्तानी सैन्य-वायु-आक्रमणे न्यूनातिन्यूनं त्रयोदशजनाः मृताः, तेषु एकादश बालकाः आसन्। एकस्मिन् वक्तव्ये तालिबान्-पक्षस्य प्रवक्ता जबीहुल्ला मुजाहिद् इत्यनेन आक्रमणस्य निन्दां कृत्वा, नागरिकगृहाणि लक्ष्यीकृत्य आक्रमणं ह्यः रात्रौ अभवत् इति उक्तम्। सः अवदत् यत्, पाकिस्तानस्य सेना पुनः एकदा अफगानिस्तान-देशस्य वायु-क्षेत्रस्य उल्लङ्घनं कृतम् अपि च तत् मानवीय अपराधं उक्तम्। पाकिस्तान अफगानिस्तान्-देशयोः मध्ये गत-कतिपयेषु मासेषु वर्धमान-द्वन्द्वस्य मध्ये एषा नवीनतमा घटना अभवत्, यत्र पुनः पुनः गोलिकाप्रहारे नागरिकानां मृत्योः चिन्ता वर्धमाना अस्ति।

## देशे सङ्कोचित-प्राकृतिकेन्धन - सी. एन. जी. इत्यस्य अभावः नास्ति-पेट्रोलियम मंत्री



केन्द्रीय पेट्रोलियम तथा प्राकृतिकेन्धन मन्त्री हरदीपसिंह पुरी वर्यः गतदिने अवदत् यत् देशे सङ्कोचित-प्राकृतिकेन्धन - सी. एन. जी. इत्यस्य अभावः नास्ति। सः अवदत् यत् सर्वकारः गृहेषु पाइप्ड-न्याचुरल गैस पी. एन. जी. इत्यस्य आपूर्ति विस्तारयति तथा च एल. पी. जी. सम्पर्कान् पी. एन. जी. सम्पर्करूपेण परिवर्तयितुं प्रयत्नाः प्रचलन्ति।

# एम्स-बिलासपुर-संस्थाने शीघ्रमेव आरप्स्यते पेल्विस- शल्यचिकित्सा-सुविधा, गंभीर- आघात- ग्रस्तेभ्यः रोगिभ्यः भविष्यति महान् लाभः



हिमसंस्कृतवार्ताः- बिलासपुरम्। प्रदेशस्य समीपवर्ति-राज्यानां ये गंभीर- आघात- ग्रस्ताः दुर्घटनाग्रस्ताः च प्राणिनः बिलासपुर- एम्स-संस्थानम् आगच्छन्ति, तेषां कृते एषा सुखदवार्ता अस्ति। संस्थानस्य अस्थिरोगविभागे शीघ्रमेव अत्यंतम् आधुनिकी 'पेल्विस-इन्स्ट्रूमेन्ट' इति शल्यचिकित्सासुविधा आरप्स्यते। अनया प्रगतया शल्यचिकित्सा-साधनसामग्र्या इदानीं कटि-नितम्ब- श्रोणि- अस्थ्नां जटिलातिजटिल-भङ्गानाम् उपचारः एम्स-संस्थाने एव सम्भवो भविष्यति। एतदर्थं एम्स-प्रशासनेन एतस्य आधुनिक- उपकरणस्य चिकित्सालये अन्तर्भावस्य प्रक्रिया तीव्रीकृता अस्ति। अस्याः आधुनिक- सुविधायाः महान् लाभः मार्ग-दुर्घटनाभिः अथवा उन्नत- स्थानात् पतनेन गंभीररूपेण आहतेभ्यः रोगिभ्यः प्राप्स्यते। पूर्वं श्रोणि-भङ्गस्य प्रकरणानां जटिलता तथा च अत्यधिक-रक्तस्रावः एतादृशः भवति स्म यत् रोगिणः तत्क्षणमेव चण्डीगढ-पीजीआई अथवा दिल्लीनगरं प्रति प्रेषणीयाः भवन्ति स्म, अथवा ते विवशाः सन्तः महार्घेषु वैयक्तिक-चिकित्सालयेषु गच्छन्ति स्म। अस्याः सुविधायाः आरम्भेण इदानीं रोगिणः बिलासपुरे एव विश्वस्तरीयम् सुरक्षितं च उपचारं प्राप्तुं शक्ष्यन्ति। अस्थिरोग-विशेषज्ञानां अनुसारं, पेल्विस-इन्स्ट्रूमेन्ट इति वास्तवतः एका विशिष्टा उच्चप्रौद्योगिकीयुक्ता शल्यचिकित्सासामग्री अस्ति। अस्याः साहाय्येन चिकित्सकाः भग्न श्रोणि-अस्थि पूर्णतः अच्युते संरेखणे स्थापयित्वा स्थिरीकर्तुं शक्नुवन्ति। शल्यक्रिया-समये विशिष्ट- साधनानां, कीलकानां, पट्टिकानां च साहाय्येन अस्थि एतादृश्या दृढतया संयूज्यते यत् रोगिणः विकृतास्थि-सन्धानस्य अथवा आजीवनं खञ्जत्वस्य (लंगड़ेपन) भयमेव समाप्तं भवति। पारम्परिक-शल्यक्रियाणाम् अपेक्षया अस्याः आधुनिक-प्रविधेः साहाय्येन कृत-शल्यक्रियायाः अनन्तरं रोगिणः सप्ताहान् यावत् शय्याश्रिताः न भवेयुः। सटीक-स्थिरीकरणस्य कारणात् शल्यक्रियापश्चात् जायमाना पीडा अत्यल्पा भवति, रोगिणः स्वास्थ्यलाभः च तीव्रगत्या भवति, येन सः शीघ्रतिशीघ्रं स्वपादद्वयेन स्थातुं समर्थो भवति। एम्स-प्रशासनेन अस्य विषयस्य विशेषं ध्यानं रक्षितं यत् यन्त्राणां कस्यापि दोषस्य कारणात् कदापि कस्यापि रोगिणः आपत्कालिका शल्यक्रिया न रुध्येत।

# केन्द्रीयमन्त्रिमण्डलेन प्रधानमन्त्रिणं दीर्घकालं यावत् निर्वाचित प्रधानमन्त्रिणं प्रशंसयन् नैकेप्रस्तावाः स्वीकृताः



केन्द्रीयमन्त्रिमण्डलेन गतदिने प्रधानमन्त्रिणं नरेन्द्रमोदिनं दीर्घकालं यावत् निर्वाचित प्रधानमन्त्रिणं प्रशंसयन् नैकेप्रस्तावाः स्वीकृताः। मंत्रिमंडलीयसभायाः अनन्तरं नवदिल्ल्यां प्रसारमाध्यमान् सम्बोधयन् सूचना-प्रसारण-मन्त्रिणा अश्विनी-वैष्णवेन उक्तं यत्, प्रस्तावेस्मिन् निर्वाचितप्रधानमन्त्रित्वेन राष्ट्राय प्रधानमन्त्री-वर्यस्य निरन्तरसेवायाः ऐतिहासिकं सोपानं चर्चितः अस्ति, तथा च अनेकान् प्रतिबद्धतान् संकल्पान् च निरूपयति । श्री वैष्णवः अवदत् यत्, प्रधानमन्त्रिणा नरेन्द्रमोदिना भयोत्पादनस्य विरुद्धं कठोरकार्याचरणं स्वीकृतम्। श्री वैष्णवः अवदत् यत्, गतदिने मन्त्रिमण्डलेन अहमदाबाद-मेट्रो (फेज-2ए) इत्यस्य विस्ताराय एकोनसप्तत्यधिकैकशताधिक द्विसहस्र कोटिरूप्यकाणां व्ययः स्वीकृतः। सः अवदत् यत्, अस्मिन् षट् किलोमीटर् सुदीर्घः मेट्रो-मार्गः, पञ्चस्थानकैः युक्तः अस्ति। मन्त्री अवदत् यत्, द्वितीय-क-चरणस्य कार्यान्वयनेन अहमदाबाद-गान्धीनगरयोः मध्ये सप्तसप्तति किलोमीटर-मितं यावत् सक्रियं मेट्रो-रेल्-जालं भविष्यति। सः अवदत् यत्, आन्ध्रप्रदेशस्य अमरावती-नगरे केन्द्र-सर्वकारस्य कार्यालय-सङ्कुलं, केन्द्र-सर्वकारस्य आवासीय-सङ्कुलं च अपि मन्त्रिमण्डलेन अनुमोदितम्।

# हिमाचलसर्वकारस्य महत् निर्णयः- ७३ सर्वकारीय-विद्यालयानां विलयः, २० विद्यालयाः पिहिताः




हिमसंस्कृतवार्ताः शिमला। हिमाचलप्रदेशसर्वकारेण शून्य-नामाङ्कनयुक्ताः (यत्र एकः अपि छात्रः नासीत्) २० सर्वकारीयाः प्राथमिकाः मध्यमिकाश्च विद्यालयाः सद्यःप्रभावेण पिधातुं निर्णयः गृहीतः अस्ति। एतेषु विद्यालयेषु कश्चनपि छात्रः नामाङ्कितः नासीत्। अपरपक्षे, ७३ सर्वकारीय- प्राथमिक- माध्यमिकविद्यालयानां सद्यः प्रभावेण समीपस्थेषु विद्यालयेषु विलयः (Merger) विहितः। अस्मिन् सन्दर्भे शिक्षासचिवस्य राकेश कंवरस्य पक्षतः अधिसूचना प्रसारिता। अधिसूचनानुसारम्, आहत्य १८ प्राथमिकाः द्वौ च माध्यमिकविद्यालयौ अधिसूचना-रहिताः कृताः सन्ति। एतेषु बिलासपुर- चम्बा- कुल्लू- मण्डी- शिमला-जनपदानां विद्यालयाः सम्मिलिताः सन्ति। पिहितेषु विद्यालयेषु सर्वाधिकसङ्ख्या शिमला-जनपदस्य अस्ति, यत्र आहत्य १० विद्यालयाः प्रभाविताः अभवन्। मण्डी-जनपदे पञ्च विद्यालयाः पिहिताः। चम्बाजनपदे द्वौ, बिलासपुर- कुल्लूजनपदयोः च एकैकः विद्यालयः पिहितः जातः। एषः निर्णयः राज्ये शिक्षाव्यवस्थां सुव्यवस्थितां कर्तुं स्वीकृतः अस्ति।

## पञ्च वा तस्मात् न्यूना छात्रसङ्ख्यायुक्तानां ७३ विद्यालयानां विलीनीकरणम्

प्रदेशसर्वकारेण राज्यस्य ७३ सर्वकारीय-प्राथमिक- मध्यमिकविद्यालयानां तत्कालप्रभावेण विलयः कृतः। एषः निर्णयः तेषां विद्यालयानां कृते स्वीकृतः, यत्र छात्राणां नामाङ्कनसङ्ख्या पञ्च वा तस्मात् अपि न्यूना आसीत्। विलयीकृतेषु विद्यालयेषु ६५ सर्वकारीय-प्राथमिक-विद्यालयाः, अष्ट (८) सर्वकारीय-माध्यमिक-विद्यालयाः च सम्मिलिताः सन्ति। एते विद्यालयाः तेषां निकटतम- सर्वकारीय- प्राथमिकविद्यालये, सर्वकारीय- केन्द्रीय- प्राथमिकविद्यालये, सर्वकारीय- माध्यमिकविद्यालये अथवा सर्वकारीय- वरिष्ठ- माध्यमिक- विद्यालये विलीनाः कृताः। एतत् पदं राज्ये शिक्षाव्यवस्थां सुदृढां कर्तुं चालितम् अस्ति। अत्रापि सर्वाधिक-विद्यालयाः मण्डी- जनपदतः सन्ति, यत्र १८ प्राथमिक- विद्यालयानां विलयः अभवत्। शिमला-जनपदे १३ प्राथमिकविद्यालयाः विलीनीकृताः। शिक्षासचिवेन राकेशकंवरेण अस्मिन् प्रक्रमे आदेशाः निर्गताः।

# उपमुख्यमन्त्रिणः, मन्त्रिणां, विधायकानां च वेतनस्थगनं समाप्तम्; सर्वकारेण प्रसारिता अधिसूचना

हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशस्य उपमुख्यमन्त्रिणः, मन्त्रिणां, विधायकानां च सहैव विधानसभाध्यक्षस्य उपाध्यक्षस्य च वेतनस्थगनं प्रतिनिवर्तयितुम् आदेशः निर्गतः अस्ति। एषः निर्णयः १८ अप्रैल २०२६ दिनाङ्कस्य पूर्वतन- अधिसूचनायाम् आंशिक-संशोधनत्वेन सम्मुखम् आगतः। स्थगितवेतनस्य राशिः जूनमासस्य वेतनेन साकं जुलाईमासे प्रदास्यते। अनेन अधुना उपमुख्यमन्त्री, सर्वे मन्त्रिणः, विधानसभासदस्याश्च स्वकीयम् अवशिष्टं वेतनं प्राप्तुं शक्ष्यन्ति। विधानसभाध्यक्षः उपाध्यक्षश्च अपि अधुना स्वपूर्णवेतनं प्राप्स्यतः। पूर्वतन- अधिसूचनायां एतेषां सर्वेषां वेतनं स्थगितं कृतम् आसीत्। तथापि, मुख्यमन्त्रिणः ५० प्रतिशत् वेतनस्थगनम् अग्रिमादेशं यावत् यथावत् स्थास्यति। एतत् स्थगनम् १८ अप्रैल २०२६ दिनाङ्कस्य अधिसूचनानुगुणं एव प्रचलिष्यति। सर्वकारेण अस्मिन् प्रक्रमे एकं स्पष्टीकरणम् अपि प्रसारितम्। एषः निर्णयः राज्यस्य वित्तीय- प्रबन्धनस्य भागरूपेण मन्यते। अस्मिन् सन्दर्भे सामान्यप्रशासनविभागस्य (संसदीयकार्यप्रकरणम्) पक्षतः अधिसूचना प्रसारिता अस्ति।

## आयव्ययक-घोषणायाम् अभवत् वेतनस्थगनस्य निर्णयः

मुख्यमन्त्रिणा प्रदेशस्य आर्थिकीं स्थितिं मार्गे आनेतुं मन्त्रिणां विधायकानां च सहैव अधिकारिणां विविधानां श्रेणीनां वेतनस्थगनस्य निर्णयः स्वकीय- आयव्ययकघोषणाकाले गृहीतः आसीत्। एषः निर्णयः १ अप्रैल दिनाङ्कात् प्रवृत्तः आसीत्, यत्र मुख्यमन्त्रिणः ५० प्रतिशत्, विधानसभाध्यक्ष- मन्त्रिणां ३० प्रतिशत्, विधायकानां २० प्रतिशत्, मुख्यसचिवात् आरभ्य सचिवस्तरस्य अधिकारिणां ३० प्रतिशतं, तस्मात् अधस्तन-श्रेणीनां २० तः ३ प्रतिशत् पर्यन्तं वेतनं षण्मासावधिं यावत् स्थगितुं निश्चयः विहितः आसीत्। तथापि, 'क', 'ख' श्रेणीनाम् अधिकारिणां वेतनस्थगन-निर्णयः १५ अप्रैल दिनाङ्के एव प्रतिनिवर्तितः आसीत्।

# इतिहासस्य वैज्ञानिकम् अध्ययनं प्रलेखनं च भाविनि-पीढीनां कृते अतीव उपयोगी- आचार्यः ललितकुमार अवस्थी





**हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा।** सरदारपटेलविश्वविद्यालय मण्डी, जीवाजी-विश्वविद्यालय- ग्वालियर च एतयोः मध्ये सञ्जातस्य अवबोधनपत्रस्य (MoU) अन्तर्गतं मण्डीनगरस्य ऐतिहासिकपुरातात्त्विकस्थलानां व्यापकसर्वेक्षणस्य शुभारम्भः त्रिलोकनाथ-मन्दिर-परिसरात् विश्वविद्यालयस्य कुलपतिः आचार्यः ललितकुमार अवस्थी अकरोत्।

अस्मिन् अवसरे आचार्यः ललित-कुमार-अवस्थी अवदत् यत् इतिहासस्य वैज्ञानिकम् अध्ययनं, संरक्षणं, प्रलेखन (दस्तावेजीकरणं) च भाविपीढीनां कृते अतीव उपयोगि वर्तते। सः अकथयत् यत् मण्डीनगरस्य समृद्ध- सांस्कृतिक- ऐतिहासिक- विरासतस्य सुव्यवस्थितं प्रलेखनं न केवलं शोधकार्येभ्यः नूतनां दिशं प्रदास्यति, अपि तु क्षेत्रस्य सांस्कृतिक- अस्मिताम् अपि सुदृढां विधास्यति। एतत् सर्वेक्षणकार्यं जीवाजी- विश्वविद्यालय- ग्वालियरनगरस्य वरिष्ठ- इतिहासविदः पुराविदः च प्रो. शान्तिदेव- सिसोदिया- महोदयस्य नेतृत्वे सम्पन्नं भूयमानम् अस्ति। अस्मिन् दले शोधार्थी राहुल बरैया, सुमन प्रिया, चान्दनी, इतिहासविभाग- सरदारपटेल- विश्वविद्यालयस्य डॉ. राकेशकुमारशर्मा, डॉ. रामपालः, राजेशशर्मा च सम्मिलिताः आसन्। एतदतिरिच्य शोधार्थी वेदः, राहुलः, राजूः, डोल्मा, सूर्यप्रकाशः, सुरेखा च अपि सर्वेक्षणकार्ये सक्रियाम् अंशभागितां निर्व्यूढवन्तः। इतिहासविभाध्यक्षः, कार्यक्रमसंयोजकः च डॉ. राकेशकुमारशर्मा सूचितवान् यत् एतत् सर्वेक्षणं मण्डी-नगरस्य ऐतिहासिक- सांस्कृतिक- धार्मिक- स्थापत्य- धरोहराणां समग्र-प्रलेखनस्य दिशि एकः महत्त्वपूर्णः उपक्रमः अस्ति। सः अवदत् यत् अस्मात् अध्ययनात् मण्डी-नगरस्य समृद्ध-विरासतेन सम्बद्धाः अनेके प्रमुखाः तथ्याः प्रकाशं गमिष्यन्ति, ये भविष्यस्य शोधार्थिनाम् इतिहासकाराणां च कृते उपकारकाः सिद्धाः भविष्यन्ति। प्रो. शान्तिदेव- सिसोदिया उक्तवान् यत् मण्डीनगरं स्वकीय- प्राचीन- मन्दिर- परम्परायाः, स्थापत्यकलायाः, सांस्कृतिक- विविधतायाः च कारणात् विशेषमहत्त्वं भजते। सर्वेक्षणदलेन नगरस्य प्रमुखाणाम् ऐतिहासिक- पुरातात्त्विक- स्थलानां भ्रमणं कृत्वा विस्तृतम् अध्ययनं कृतम्। अस्मिन् अन्तराले इतिहासविदः डॉ. कमलप्यासा महोदयस्य दुर्लभ- मुद्रा- सङ्ग्रहालयस्य अवलोकनं विहितम्। इसके अतिरिक्तं त्रिलोकनाथमन्दिरं, पञ्चवक्त्र- महादेवमन्दिरं, भूतनाथमन्दिरं, अर्धनारीश्वर- मन्दिरं, राजमहलपरिसरः, नगरस्य प्राचीनाः जलस्रोतांसि, पारम्परिक-जल-प्रबन्धनसंरचनाः च विशेषरूपेण सर्वेक्षिताः। अस्मिन् अवसरे इनटेक- मण्डी-अध्यायस्य सह-संयोजकः अनिल शर्मा, विनोदबहलः, इतिहासविभागात् डॉ. रामपालः, राजेशशर्मा, शोधार्थी वेदः, राहुलः, राजुः, डोल्मा, सूर्यप्रकाशः, सुरेखा, जीवाजी-विश्वविद्यालयस्य शोधार्थी राहुल बरैया, सुमन प्रिया अन्याः छात्राश्च उपस्थिताः आसन्।

# मोदी-सर्वकारस्य १२ वर्षाणि पूर्णानि,

## दिवसद्वयस्य प्रवासाय हिमाचलम् आगच्छति नड्डा

## *स्वच्छता-अभियानतः 'प्रगति-पथ-यात्रा' पर्यन्तं बहुषु कार्यक्रमेषु विधास्यति सहभागित्वम्*



**हिमसंस्कृतवार्ताः- शिमला।** प्रधानमन्त्रिणः नरेन्द्रमोदिनः निरन्तरं १२ वर्षाणां सफल- कार्यकालस्य पूर्णतायाः उपलक्ष्ये केन्द्रीय- स्वास्थ्य एवं परिवारकल्याण रसायन एवं उर्वरकमन्त्री जगत्प्रकाशनड्डा जूनमासस्य १२ तथा १३ दिनाङ्कयोः दिवसद्वयस्य हिमाचल-प्रवासे स्थास्यति। भारतीय-जनता-दलस्य (भाजपा) प्रदेशमहामन्त्री पायलवैद्या एतां सूचनां यच्छन्ती प्रधानमन्त्रिणं नरेन्द्रमोदिनं ४३९९ दिनानाम् ऐतिहासिक- कार्यकालस्य पूर्णतायै देशस्य सुदीर्घकालं यावत् सेवा-प्रदातारं प्रधानमन्त्रिणं भवितुम् अभिनन्दनं कृतवती। पायलवैद्यया प्रोक्तं यत् प्रधानमन्त्रिणः मोदिनः कार्यकालः सेवा, सुशासनं, निर्धन-कल्याणं राष्ट्र-निर्माणाय सर्वदा संस्मरिष्यते। तस्य नेतृत्वे भारतेन वैश्विकस्तरे नवीनः परिचयः स्थापितः तथा विविधेषु क्षेत्रेषु उल्लेखनीयाः उपलब्धयः अर्जिताः। तया विज्ञापितं यत् स्वकीय- हिमाचल- प्रवासकाले जगत्प्रकाशनड्डाः १२ जूनदिनाङ्के शिमलानगरे आयोजिते स्वच्छता-अभियाने भागं ग्रहीष्यति।

तदनन्तरं सः 'विकसित-भारत-सङ्कल्प-सम्मेलने' सम्मिलितः भूत्वा केन्द्रसर्वकारस्य १२ वर्षाणाम् उपलब्धीनां, जनकल्याणकारी-योजनानाम्, आधारभूत-संरचनायाः विकासस्य तथा विकसित- भारतस्य लक्ष्यं च आधृत्य स्व-विचारान् उपस्थापयिष्यति। एतदतिरिच्य सः विविध-सामाजिक- सङ्घटनैः, प्रबुद्धनागरिकैः, बुद्धिजीविभिश्च सह संवादात्मक-कार्यक्रमेषु अपि सहभागित्वं विधास्यति। १३ जून-दिनाङ्के नड्डा माध्यम-प्रतनिधिभिः सह सम्भाषणं करिष्यति तथा केन्द्रसर्वकारस्य सहयोगेन प्रदेशे विकसितानां प्रमुखाणाम् आधारभूत-संरचना-परियोजनानाम् अवलोकनं विधास्यति। सः 'प्रगति-पथ-यात्रायाम्' अपि सम्मिलितः भविष्यति, यस्याः माध्यमेन विकासकार्याणां परियोजनानां च प्रगतेः समीक्षणं करिष्यते। पर्यावरण-संरक्षणस्य सन्देशम् अग्रे नेतुं सः पादपारोपण-कार्यक्रमे (पौधारोपण) अपि भागं ग्रहीष्यति। पायलवैद्यया कथितं यत् प्रधानमन्त्रिणः मोदिनः नेतृत्वे देशेन आर्थिक-विकास, महिला- सशक्तिकरण, स्वास्थ्यसेवा, अङ्कीयक्रान्ति तथा राष्ट्रिय-सुरक्षायाः क्षेत्रेषु नवीनाः उन्नतयः प्राप्ताः। तया प्रदेशवासिनः एतेषु कार्यक्रमेषु सोत्साहं भागं ग्रहीतुम् आह्वानं कृतम्।

# श्रम-एवं-रोजगार-विभागस्य सर्वाः सेवाः ऑनलाइन-माध्यमेन भवन्तु, मुख्यमन्त्रिणा अधिकारिणः आदिष्टाः



हिमसंस्कृतवार्ताः- शिमला। मुख्यमन्त्रिणा सुखविन्दरसिंह-सुक्खुना मङ्गलवासरे श्रम-एवं-रोजगार-विभागस्य समीक्षा-उपवेशनस्य अध्यक्षता कृता। तेन विभागेन सञ्चालितानां विविधानां कल्याणकारी-योजनानां प्रगतेः समीक्षां कुर्वता अधिकारिणः आदिष्टाः यत् एतासां योजनानां लाभः सर्वेभ्यः पात्र-लाभार्थिभ्यः समयबद्ध- प्रभाशालिरूपेण च प्रापणीयो भवेत्। तेन विभागस्य प्रमाणपत्राणि अनुज्ञप्ति (लाइसेन्स) इत्यादीनां सेवानां प्रक्रियां पूर्णतः ऑनलाइन- अङ्कीय (डिजिटाइज) च कर्तुं निर्देशाः प्रदत्ताः, येन जनेभ्यः कस्यापि प्रकारकस्य असुविधायाः सम्मुखीकरणं न भवेत्। मुख्यमन्त्रिणा प्रतिपादितं यत् 'राजीव गान्धी स्वरोजगार स्टार्ट-अप योजना-२०२३' इत्यस्याः अन्तर्गतं यूनां कृते ई-टैक्सी (e-Taxi) क्रयणाय ५० प्रतिशतं अनुदानं प्राप्यते। तेन कथितं यत् वित्तीयवर्षे २०२६-२७ अवधौ ५०० अतिरिक्तेभ्यः युवभ्यः ई-टैक्सी क्रयणाय ५० प्रतिशतं अनुदानं प्रदास्यते, यदर्थं आयव्ययके (बजट) ५० कोटि रूप्यकाणां प्रावधानं कृतम् अस्ति। तेन उक्तं यत् अस्मिन्नेव वित्तीयवर्षे ५०० यूनां कृते ई-रिक्शा, क्रयणाय प्रत्यक्ष-लाभ-हस्तान्तरणस्य माध्यमेन ५०० प्रतिशतं पूँजीगत-अनुदानम् अपि प्रदास्यते। अस्याः प्रवृत्तेः उद्देश्यं यूनां कृते स्वरोजगारस्य अवसराणां प्रदानेन सहैव पर्यावरण- अनुकूल- परिवहनस्य प्रोत्साहनं वर्तते।

मुख्यमन्त्रिणा विज्ञापितं यत् राज्ये व्यापार- उद्योगाणां प्रोत्साहनाय तथा व्यवसाय-सुगमतायाः वर्धनाय राज्यसर्वकारेण 'हिमाचल प्रदेश दुकान एवं वाणिज्यिक प्रतिष्ठान अधिनियम, १९६९' इत्यस्य नियमेषु च संशोधनं विहितम्। संशोधितानां प्रावधनानाम् अन्तर्गतं एषः अधिनियमः समग्र-प्रदेशे अत्यधिक-प्रभाशालिरूपेण प्रवृत्तो भविष्यति तथा आपणानि वाणिज्यिक-प्रतिष्ठानानि च चतुर्विंशति- होराः (२४ घण्टे) सञ्चालनाय अनुमतिः प्रदत्ता। मुख्यमन्त्रिणा प्रोक्तं यत् अस्मात् निर्णयात् व्यापारिक-गतिविधिभ्यः गतिः प्राप्स्यते, उद्यमिनः अधिकाः सुविधाः प्राप्स्यन्ति तथा उपभोक्तृभ्यः अपि स्वा विवेकानुसारं क्रयणस्य अवसराः प्राप्स्यन्ते। तेन कथितं यत् राज्यसर्वकारः व्यवसाय-सुगमतां सुदृढीकर्तुं अनुपालन-प्रणालीं सरलां प्रभावशालिनीं च कर्तुं दिशि कार्यं करोति। अनेन सहैव श्रमिकाणाम् अधिकाराणां रक्षा तथा तेषां कल्याणमपि समानरूपेण प्राथमिकतायां स्थाप्यते।

# वाच्यकथा-: "वास्त्विकी सम्पदा" (असली विरासत)



डॉ. अमनदीप शर्मा, हिमसंस्कृतवार्ता

तीव्रा वृष्टिः आसीत्। अमितः स्वमोटरयानं पार्श्वे अस्थापयत्, एकस्यां चायशालायां च अतिष्ठत्। चायपानं कुर्वतैव तस्य बाल्यकालस्य स्मृतयः नूतनाः अभवन्। पिता अस्मिन्नेव विटपे (ठेले) तिष्ठति स्म। सा एव हास्यमयी चर्चा, तान्येव वचनानि।

अमितः चायविक्रेतारं अपृच्छत्, "पितृव्य! मम पिता रामलखनमहोदयः अत्र चायपानं करोति स्म, किं स्मरति भवान्?" चायविक्रेतुः नेत्रे अश्रुपूर्णे अभवताम्। "अहो! सः तु मम ग्रामस्य मित्रम् आसीत्। नगरं आनेता अपि स एव आसीत्। उक्तवान् आसीत् – ग्रामे किं वर्तते, चल नगरे आपणं स्थापय। अद्य अहं यत्किमपि अस्मि, तत् तस्यैव कारणात् अस्मि। कुत्र अस्ति सः? बहुदिनेभ्यः न दृष्टः।" अमितः मन्दस्वरेण अवदत्, "मासद्वयात् पूर्वं हृदयघातेन (हार्ट अटैक) सः दिवंगतः।" चायविक्रेता स्तब्धः जातः। ततः अवदत्, "वत्स! तव पिता देवतुल्यः आसीत्। मम द्वयोः पुत्र्योः विवाहे सः तूष्णीं दश-दश सहस्ररूप्यकाणि दत्तवान्। कदापि न कथितवान्, केवलम् अवदत् – पुत्री तु सर्वेषां सामान्या भवति।"

अमितस्य कण्ठः रुद्धः अभवत्। गृहं गत्वा सः मात्रे न्यवेदयत्। माता दीर्घं श्वासं जग्राह, अवदत् च, "वत्स! तव पिता अस्मभ्यं गृहं, धनं, प्रतिष्ठां च सर्वं दत्तवान्। परन्तु स्वस्य वास्तिविकीं अर्जनम् अस्मभ्यं कदापि न दर्शितवान्।"

"का सा कमायी माता?" "पुण्यस्य अर्जनं वत्स! वित्तकोषधनं तु अत्रैव अवशिष्यते। सह गच्छति तु केवलं नाम। तव पिता धनवान् नासीत्, परन्तु हृदयस्य धनी आसीत्। वयं बन्धूनां पुरतः श्रेष्ठं भवितुं प्रयतन्ते स्मः, सः तु अपरिचितानां कृते महत् कार्यं कृत्वा गतः।" अमितस्य नेत्राणि उन्मीलितानि अभवन्। पितुः कपाटात् एका पुरातनी दैनन्दिनी (डायरी) निष्कासिता। तस्यां दर्जनमितानि नामानि आसन् – कस्यचित् शुल्कं, कस्यचित् औषधं, कस्यचित् ऋणम्। अन्तिमे पृष्ठे लिखितम् आसीत्: "नाम्ने मा ददातु, आवश्यकतायै ददातु। यदि दक्षिणेन हस्तेन ददासि, तर्हि वामहस्तः अपि न जानीयात्।"

तस्मिन् दिने अमितः निश्चितवान् यत् पितुः वास्तिविकी सम्पदा (विरासत) धनं नास्ति, अपितु तस्य 'दानशीलतायाः स्वभावः' अस्ति। सः स्ववेतनस्य १०% भागं 'पितुः पुण्यखाता' इति नाम्ना पृथक् अकरोत्।

**शिक्षाः** पदं, धनं, गृहं च – एतत्सर्वं तव सम्पत्तिः अस्ति। परन्तु तव श्रेष्ठता, तव साहाय्यं, तव व्यवहारः च – एषा तव 'सम्पदा' अस्ति। सम्पत्तिः उत्तराधिकारिषु विभज्यते, सम्पदा तु पीढ़ीभ्यः स्मर्यते। वास्त्विकः धनी सः नास्ति यस्य वित्तकोषे कोटिरूप्यकाणि सन्ति, वास्त्विकः धनी तु सः अस्ति यस्य गमनान्तरं लोकानां नेत्राणि नम्राणि (अश्रुपूर्णानि) भवेयुः।

## "लौकिकन्यायकोशः" "अतिपरिचयन्यायः"

अतिपरिचयेन प्रेमापेक्षया अपमान एव भवति इत्यस्य न्यायस्य अर्थः। यथा-
चन्दन इति अत्यन्तं मूल्यवान् सुगन्धी वृक्षः मलयपर्वते अधिकप्रमाणेन उपलभ्यते। अधिकप्रमाणेन लभ्यते इति कारणेन तत्रस्थाः भिल्लमहिलाः तस्य वृक्षस्य मूल्यम् अज्ञात्वा तम् इन्धनरूपेण विनियुञ्जते।

*"अतिपरिचयाद् अवज्ञा सन्ततगमनाद् अनादरो भवति। मलये भिल्लपुरन्ध्री चन्दनतरूकाष्ठमिन्धनं कुरुते"।।*
(शार्ङ्धरपद्धतिः ८३)

डा. वर्षा प्रकाश टोणगांवकर
पुणे/ महाराष्ट्र



हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। जापानदेशे भल्लूकभयात् चतुर्नवतिः विद्यालयाः पिहिताः।
एकस्य भल्लूकस्य अन्वेषणाय सर्वैः आरक्षकैः महान् यत्नः कृतः।
**काव्या-** नमस्ते नन्दिनि! सः भल्लूकः नगरे महाभीतिं जनितवान् अस्ति।
अधुना द्वितीया वार्ता श्रूयताम्। एकेन पुरुषेण स्वप्रियायै लक्षत्रयमूल्यकं क्रीडा-सङ्गणकयन्त्रम् उपहाररूपेण दत्तम्। किन्तु तया द्वितीये दिने एव सम्बन्ध-विच्छेदः कृतः!
**नन्दिनी-** अहो! तेन पुरुषेण महाकष्टम् अनुभूतम्। धनं च नष्टम्, प्रिया अपि गता!
इतः परम् अन्या विचित्रा वार्ता कानपुरमण्डले श्रुता। तत्र एकेन पुरुषेण स्वभार्यां त्यक्त्वा, स्वश्वश्रूः च परिणीता! अयं विषयः जनैः सामाजिकमाध्यमेषु बहु चर्चितः।
**काव्या-** एतादृशः सम्बन्धः तु लोकविरुद्धः अस्ति, सर्वैः निन्दितः च।
इदानीम् उत्कलप्रदेशात् शुभवार्ताम् शृणुमः। तत्र अधिकारिभिः "अस्माकं विद्यालयः अस्माकं समीपे" इति योजना आरब्धा। अनया योजनया अनेकेषां दरिद्रबालकानां जीवनं सुखमयम् उत्तमं च कृतम्।
**नन्दिनी-** सत्यम्, चल-विद्यालयेन तेषां बालकानां जीवनं परिवर्तितम्। एषा अतीव प्रशस्या वार्ता। अद्यतनः कार्यक्रमः अत्रैव समाप्यते।
पुनः मिलामः,

## संस्कृतं मधुरं सदा- ४९



हिमसंस्कृतवार्ता
असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः

भारतस्य उत्तरपूर्वाञ्चले सप्तभगिनीवत् सप्तराज्येषु असमराज्यम् अन्यतमं, यत्र च पुराणप्रसिद्धं पवित्रं कामाख्याधाम विराजमानमस्ति। एवमेव इतिहासप्रसिद्धः महाबाहुः ब्रह्मपुत्रनदः अस्य राज्यस्य जीवन् साक्षी वर्तते। महापुरुषस्य श्रीशङ्करदेवसदृशः तथा श्रीमाधवदेवसदृशः इत्यनयोः धर्ममार्गप्रदर्शकयोः गुर्वोः पावनभूमिः वर्तते इयम्। नानाजात्युपजातीनां, नानाधर्मभाषिणाञ्च वासक्षेत्रमिदं, यच्च कस्याञ्चन पुष्पवाटिकायां राजमानस्य, शोभमानस्य च नानापुष्पसमूहस्य रमणीयदृश्यवत् अत्रत्याः जनाः सुशोभमानाः सन्ति परम्परया। अन्येषु विविधेषु क्षेत्रेषु इव अत्रस्थं शिक्षाक्षेत्रमपि प्रायः समुन्नतमेव। अत्र संस्कृतशिक्षायाः प्रभावोऽपि विकासोन्मुखः हि दृश्यते। शनैः विषयेऽस्मिन् जनानाम् अनुरागः वर्धमानः अवलोक्यते। प्रायः सर्वेषु जनपदेषु संस्कृतस्य सम्प्रसारणं प्रवर्तमानमस्ति। एतासु जिलासु विश्वनाथजिला अन्यतमा। विश्वनाथजिलान्तर्गता संस्कृतभारतीगोष्ठी क्रमेण अग्रगतिशीला, प्रगतिशीला वा सञ्जाता दृश्यते। अत्रत्याः बहवः जनाः संस्कृतपरिचयम्, तद्विषयकम् अनुरागं च प्राप्नुवन्तः परिलक्ष्यन्ते। २०१८- ख्रिष्टाब्दे गोष्ठीयं नागशङ्करपीठपरिसरे समारदलनि-नामके ग्रामे जन्म लब्धवती। ततः शिशुवत् शनैः एधमाना एषा इदानीं कैशोर्यावस्थां प्राप्तवती अस्ति। यथा अङ्कुरतः पूर्णवृक्षः जायते इतिवत् इयमपि अग्रिमकालेषु पूर्णावस्थां प्राप्नुयाद् इत्यत्र न सन्देहः। परन्तु तदर्थम् अत्रत्यानां कार्यकर्तॄणां, संस्कृताध्यापकानां, संस्कृत- विद्यार्थिनां, संस्कृतानुरागिणां, पण्डितपुरोहितानां, कथावाचकानां, सामान्य-जनानाञ्च समेषाम् एकान्तनिष्ठा-भावः, सेवा- सहयोगिता, पारस्परिकी प्रीतिः, सहिष्णुता, औदार्यम् इत्यादयः गुणाः अपेक्ष्यन्ते। कारणं देवभाषा हि तादृशी वर्तते, या च सदैव सद्गुणान् हि इच्छति। अतः अस्माभिः सर्वैः सम्भूयः प्रीतिसहयोगपूर्णभावनया संस्कृतम् अग्रे अग्रे नेतव्यम्। तदा गुप्तकाशी-नामधेयं विश्वनाथक्षेत्रमिदम् अवश्यमपि सार्थकं भविष्यति, नात्र शङ्कास्थानम् इति।




## गल्लां कने पेट नी भरने

गल्लां कने पेट नी भरने
पेटा खातर कमाणे पौणा
घरें नी मिलणा सब कुछ मित्रो
कदी बाहर बी जाणे पौणा

नींद नी टोले बिस्तर गद्दे
पुईयाँ ई फेरी सौणे पौणा
बीता बेला हत्थ नी औंदा
बादा च फेरी रोणे पौणा

सड़कां हमेशा साथ नी देणा
कदी तां पगडंडिया बी जाणे पौणा
पका पकाया कितनी देर मिलगा
अप्पू बी कदी तां बनाणे पौणा

उम्र भर किसी बी साथ नी रहणा
कदी तां कलेयां बी रहणे ई पौणा
पलंग कने गद्दे सदा नी मिलणे
आखिर बेले पुइयाँ ई सौणे पौणा

प्योके हुंदे मावां बुढेयाँ कने
तिन्हां बी कितना साथ नभाणा
भाई भाभी अपणे अपणे मस्त
औणा धियाँ ध्याणी रा घट हुई जाणा

मेल मिलाप सब रखो मित्रो
पता नी काहलू जाणे पौणा
इक्क बार सैजे छुड्डी कने चली गया
तिसते बिना ई फेरी टैम बताणे औणा


रवींद्र कुमार शर्मा घुमारवीं जिला बिलासपुर हि प्र 7018853800

### विदेशमन्त्रिणः डॉ. सुब्रह्मण्यम जयशङ्करस्य बुल्गारियादेशस्य सोफियास्थित-राष्ट्रिय-ऐतिहासिक-सङ्ग्रहालयस्य यात्रा

विदेशमन्त्री डॉ. सुब्रह्मण्यम जयशङ्करः बुल्गारियादेशस्य सोफियानगरे स्थितस्य राष्ट्रिय-ऐतिहासिक-सङ्ग्रहालयस्य दर्शनं कृतवान्। सामाजिक-माध्यम-सन्देशे (सोशल मीडिया पोस्ट) डॉ. जयशङ्करः अवदत् यत् सः सहस्रवर्षप्राचीनानां कलाकृतीनां महत्त्वपूर्ण-सङ्ग्रहस्य अवलोकनं कृतवान्। सः समृद्धेतिहासस्य सांस्कृतिकविरासतेश्च विविधानां पक्षाणां संरक्षणस्य विषये जानकारीं प्राप्तवान्। डॉ. जयशङ्करः सम्प्रति सोफियानगरे अस्ति यत्र सः बुल्गारियादेशस्य विदेशमन्त्रिणा सह मेलिष्यति।

**फिनलैण्डयात्रा कुल्टारन्टा-वार्ता च-** डॉ. जयशङ्करः कुल्टारन्टा-वार्तायां भागं ग्रहीतुं श्वः फिनलैण्डदेशं प्रति प्रस्थास्यते। अस्याः वार्तायाः विषयः अस्ति- "परिवर्तनशीलं जगत्: वैश्विकं, क्षेत्रीयं, स्थानीयञ्च परिदृश्यम्" इति। इतः परं डॉ. जयशङ्करः फिनलैण्डदेशस्य विदेशमन्त्रिणा सह अपि चर्चां करिष्यति।

# शिक्षाक्षेत्रे कृत्रिमप्रज्ञायाः (AI) प्रयोगाः



कृत्रिमप्रज्ञा (AI) शिक्षाक्षेत्रे विविधानां प्रयोगाणाम् अवसरं प्रदाति, येन छात्राणां पठनरीतिः, शैक्षणिकसामग्र्या सह सम्बद्धता तथा च सहायताप्राप्तिप्रक्रिया सर्वथा परिवर्तते। छात्रेभ्यः कृत्रिमप्रज्ञायाः उपयोगस्य केचन प्रमुखाः मार्गाः अधोलिखिताः सन्तिः

### १. वैयक्तिकीकृतं शिक्षणम् (Personalized Learning)

कृत्रिमप्रज्ञायाः अल्गोरिदम-प्रणाली छात्राणां अध्ययनपद्धतीनां, सबलपक्षाणां तथा च दुर्बलतानां विश्लेषणं करोति। एतस्य तथ्यस्य (डेटा) उपयोगः वैयक्तिकीकृत-शिक्षणानुभवानां निर्माणाय क्रियते, येन प्रत्येकं छात्रस्य अनुरुपं पाठ्यसामग्री तथा च पठनगतिः सुव्यवस्थिता भवति। वैयक्तिकीकृतशिक्षणं निश्चितं करोति यत् छात्राः येषु क्षेत्रेषु दुर्बलाः सन्ति तत्र लक्षितसहायतां प्राप्नुयुः, तथा च येषु विषयेषु ते प्रविष्टाः सन्ति तत्र स्वेच्छानुसारं प्रगतिं कर्तुं शक्नुयुः।

### २. चतुर-शिक्षकाः (स्मार्ट-ट्यूटर्स) शैक्षणिकसहायकाश्च

AI-सञ्चालिताः शिक्षणप्रणाल्यः शैक्षणिकसहायकाश्च छात्रेभ्यः सद्यः (त्वरित) सहायतां मार्गदर्शनञ्च यच्छन्ति। एताः प्रणाल्यः प्रश्नानाम् उत्तराणि दातुं, जटिलानां विषयाणां व्याख्यां कर्तुं तथा च संवादात्मकपाठ्यक्रमान् प्रदातुं शक्नुवन्ति, येन छात्रेभ्यः कक्षायाः बहिः अपि अतिरिक्ताः संसाधनाः मिलन्ति।

### ३. स्वचालित-मूल्याङ्कनं प्रतिपुष्टिश्च (Automated Grading and Feedback)

कृत्रिमप्रज्ञा-प्रौद्योगिकी दत्ताङ्कानां (assignments) परीक्षाणां च मूल्याङ्कनप्रक्रियां स्वचालितं कर्तुं शक्नोति। 'मशीन लर्निंग' अल्गोरिदम उत्तराणां परीक्षणं कृत्वा छात्रेभ्यः शीघ्रं, स्थायि च प्रतिपुष्टिं (फीडबैक) दातुं शक्नोति। एतेन शिक्षकाः विशिष्टशिक्षणस्य आवश्यकतासु अवधानं दातुं तथा च लक्षितसहायतां प्रदातुं समर्थाः भवन्ति।

### ४. भाषाशिक्षणं अनुवादश्च

AI-सञ्चालितानि भाषाशिक्षणमञ्चानि छात्राणां दक्षतास्तरानुसारं परिवर्तनं कर्तुं शक्नुवन्ति, येन ते अनुकूलितपाठ्यान् अभ्यासकार्याणि च प्रदास्यन्ति। AI-आधारित-अनुवादसाधनानि छात्रान् विविधासु भाषासु अवबोधने सम्भाषणे च साहाय्यं कुर्वन्ति, येन शिक्षणप्रक्रियायां भाषायाः प्रतिबन्धाः दूरीभवन्ति।

### ५. संवर्धिता सामग्री-निर्मितिः (Enhanced Content Creation)

AI-साधनानि शिक्षकाणां छात्राणां च आकर्षक-शैक्षणिकसामग्र्याः निर्माणे साहाय्यं कर्तुं शक्नुवन्ति। उदाहरणार्थम्, AI-अल्गोरिदम संवादात्मकप्रश्नोत्तरीणां निर्माणं, शैक्षणिकक्रीडानां प्रारूप-रचनां, तथा च छात्रस्य व्यक्तिगत-आवश्यकतानुसारं अनुकूलित-शिक्षणसामग्र्याः उत्पादनमपि कर्तुं शक्नोति।

### ६. प्रारम्भिक-हस्तक्षेपः विशिष्टशिक्षा च (Early Intervention and Special Education)

AI-प्रणाल्यः छात्रेषु पठनविकारस्य (learning disabilities) अथवा आह्वानानां लक्षणानां प्रारम्भिकचरणे एव पहिचानं कर्तुं शक्नुवन्ति। व्यवहारपद्धतीनां पठनतथ्यानां च विश्लेषणं कृत्वा, AI शिक्षकान् विशिष्ट-शैक्षणिक-आवश्यकतायुक्तेभ्यः छात्रेभ्यः समये हस्तक्षेपं वैयक्तिकीकृतसहायताञ्च प्रदातुं साहाय्यं कर्तुं शक्नोति।

### ७. तथ्य-विश्लेषणं पूर्वानुमानात्मक-विश्लेषणञ्च (Data Analysis and Predictive Analytics)

AI-सञ्चालितं तथ्य-विश्लेषणं प्रवृत्तीनां प्रतिरूपाणां च विश्लेषणाय विशालमात्रायां शैक्षणिकतथ्यानां विश्लेषणं कर्तुं शक्नोति। शिक्षकाः संस्थाश्च एतस्याः सूचनायाः उपयोगं तथ्य-आधारित-निर्णयान् कर्तुं, शिक्षणपद्धतीनां विकासं कर्तुं तथा च समग्र-शैक्षणिक-परिणामान् सुधारयितुं कर्तुं शक्नुवन्ति।

### ८. आभासी-संवर्धित-सत्यता-शिक्षणम् (Virtual and Augmented Reality Learning)

यदा AI-तन्त्रं आभासी (Virtual) एवं संवर्धित (Augmented) सत्यता-प्रौद्योगिकीभिः सह सम्बद्धं भवति, तदा एतद् अतीव प्रभावशालि-शिक्षणानुभवान् सृजति। छात्राः ऐतिहासिकस्थलानां भ्रमणं कर्तुं, जटिलानां वैज्ञानिकानां प्रयोगाणां सम्पादनं कर्तुं, अथवा विश्वस्य विविधभागेषु यात्रां कर्तुं शक्नुवन्ति, येन तेषां विविधानां विषयाणां समझः दृढा भवति।

### ९. भावात्मकबुद्धिमत्ता मानसिकस्वास्थ्यसहायता च

AI-प्रणाल्यः मुखाकृत्याः अन्येषां सङ्केतानां च माध्यमेन छात्राणां भावनात्मकस्थितीनां विश्लेषणं कर्तुं शक्नुवन्ति। एताः प्रद्योगिक्यः भावनात्मकसमर्थनं दातुं, तनावस्य लक्षणानां अन्वेषणं कर्तुं, तथा च यदा छात्रेभ्यः मानसिकस्वास्थ्यसम्बद्धा सहायता आवश्यकी भवति, तदा शिक्षकान् परामर्शदातृन् वा सचेतयितुं शक्नुवन्ति।

**उपसंहारः**-शिक्षाक्षेत्रे AI-तन्त्रस्य समावेशः शिक्षणप्रक्रियायां क्रान्तिकारी परिवर्तनं आनेतुं सामर्थ्यं धारयति, येन सर्वसामर्थ्ययुक्तानां सर्वेषां च वयसां छात्राणां कृते शिक्षा अधिका सुलभा, वैयक्तिकीकृता, प्रभावशालिनी च भविष्यति। तथापि, एतद् निश्चितं करणीयम् यत् एतेषां प्रद्योगिकीनां उपयोगः नैतिकरूपेण भवेत्, यस्य मुख्यं लक्ष्यं शैक्षणिकानुभवस्य संवर्धनं तथा च छात्राणां समग्रविकासस्य (holistic development) समर्थनं स्यात्।

@इंजी. हिमांशु शर्मा वोक.ITES, कनेड़

# जीवन-सौन्दर्य-दिवसः

मानवजीवनं संसारस्य समस्तसंरचनासु सर्वश्रेष्ठं, भगवतः अनुपमं च वरदानम् अस्ति। अस्मिन् प्रकृत्याः विशाले अङ्गणे जीवनस्य प्रत्येकं क्षणं, प्रत्येकं च रूपं केनचित् अपूर्वेण सौन्दर्येण परिपूर्णम् अस्ति। एतस्य एव जीवनस्य महत्त्वं, गरिमां, सकारात्मकतां, आन्तरिकं च सौन्दर्यम् अनुभवितुं प्रतिवर्षं 'जीवन-सौन्दर्य-दिवसः' आयोज्यते। अस्य दिवसस्य आयोजनस्य मुख्यम् उद्देश्यं वर्तते यत् आधुनिकजीवनस्य धावमानप्रक्रियायां, चिन्तासु, मानसिकतनावस्य च तिमिरे वयं यत् जीवनस्य वास्तविकं आनन्दं विस्मृतवन्तः, तस्य पुनः अन्वेषणं करणीयम्।

## जीवन-सौन्दर्यस्य वास्तविकं स्वरूपम्

सामान्यता जनाः बाह्यं रूपं, धन-दौलतं, विलासितायाः साधनानि च जीवनस्य सौन्दर्यम् मन्यन्ते। परन्तु दर्शनशास्त्रानुसारं जीवनस्य सौन्दर्यं बाह्यस्वरूपे न, अपितु अस्माकं विचारेषु, पवित्रभावनासु, सत्कर्मसु च निहितं अस्ति। "सत्यं शिवं सुन्दरम्" इति भारतीयसंस्कृतेः मूलमन्त्रः अस्ति। यद् सत्यं कल्याणकारी च भवति, तदेव यथार्थतः सुन्दरं भवति।परस्परं स्नेहः, सहानुभूतिः, त्यागः, सेवाभावना च जीवनस्य आन्तरिकं सौन्दर्यं वर्धयन्ति। यदा वयं कस्यचित् आर्त्तस्य (दुःखिनः) अश्रूणि प्रमार्ष्टुं प्रयतामहे, अथवा कस्यचित् असहायस्य जीवनं प्रकाशमयं कुर्मः, तदा अस्माकं हृदये यः असीमः सन्तोषः उदितः भवति, सः एव जीवनस्य परमं सौन्दर्यम् अस्ति।

## प्रकृतिः जीवनस्य सौन्दर्यविधात्री

मनुष्यस्य जीवनं प्रकृत्या सह घनिष्ठरूपेण सम्बद्धम् अस्ति। प्रकृतेः विविधाः रङ्गाः जीवनस्य सौन्दर्यम् द्विगुणीकुर्वन्ति। प्रभाते सूर्यस्य सुवर्णमयाः किरणाः, रात्रौ चन्द्रस्य शीतला चांदनी, गगने मेघानां गर्जनम्, उपवनेषु विकसितानि सुगन्धितानि पुष्पाणि, पक्षिणां मधुरः कलरवः, नदीनां कलकलध्वनिः च—एतत् सर्वं प्रकृतेः अनुपमं सौन्दर्यं अस्ति यद् अस्माकं क्लान्तं मनः आनन्देन प्रफुल्लितं करोति। जीवन-सौन्दर्य-दिवसे प्रकृत्याः एतेषां उपादानानां संरक्षणस्य, तैः सह तादात्म्यं स्थापितुं च सङ्कल्पः क्रियते।

## सकारात्मकता प्रतिकूलता च

जीवने सुखं दुःखं च चक्रवत् परिवर्तते—"चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च"। अनुकूलपरिस्थितौ सर्वं सुन्दरं दृश्यते, परन्तु वास्तविकं जीवन-सौन्दर्यं तु तदा प्रकटीभवति यदा मनुष्यः प्रतिकूलपरिस्थितौ, सङ्कटकाले अपि धैर्यं न त्यजति। आशावादः जीवनस्य मूलमन्त्रः अस्ति। यः मनुष्यः प्रत्येकस्मिन् आह्वाने अवसरं पश्यति, यः पतित्वा अपि पुनः उत्थातुं जानाति, तस्य कृते जीवनं सर्वदा एकः उत्सवः इव भवति। एषः दिवसः अस्मान् सर्वदा आशावादिना भवितुं प्रसूते।

## सामाजिकसम्बन्धाः जीवनस्य आधारे

मनुष्यः एकः सामाजिकः प्राणी अस्ति। एकाकी मनुष्यः कदापि आनन्दं प्राप्तुं न शक्नोति। अतः परिवारे मातापित्रोः वात्सल्यम्, भ्रातृ-भगिनीनां प्रेम, मित्राणां निःस्वार्थः स्नेहः, समाजस्य सहयोगः च जीवनं मधुरं सुरम्यं च कुर्वन्ति। एतेषाम् मानवीयानां सम्बन्धानां पोषणं, तेषु स्थितानां कटुतानां विस्मरणं च अस्य दिवसस्य प्रमुखं सन्देशं अस्ति। जीवन-सौन्दर्य-दिवसस्य अवसरे वयं सर्वे प्रतिज्ञां कुर्याम यत् वयं ईर्ष्या-द्वेष-अहङ्कारादीन् विकारान् त्यक्त्वा प्रेम्णा, करुणया च पूर्णं जीवनं यापयिष्यामः। जीवनं बहुमूल्यं क्षणभङ्गुरं च अस्ति, अतः अस्य प्रत्येकं क्षणं उत्सववत् जीवनीयम्। आगच्छन्तु, वयं सर्वे मिलित्वा स्वात्मानं समाजं च सुसंस्कृतं कृत्वा एतत् वसुन्धरां स्वर्गादपि सुन्दरं रचयाम, यतोहि—**"जीवनं खलु सुन्दरम्, तस्य आस्वादनं करणीयम्।"**